| अथ प्रकीर्णकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णोदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | पूर्व्वोक्तकालादल्पकालसङ्करे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | स्वल्पतरे पराकः। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |
| | अत्यन्तस्वल्पकाले कृच्छ्रत्रयम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | शूद्रस्यात्र प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | चाण्डालादिसङ्करे गृहादिशुद्धिर्यथा। भवनदहनं अर्थात् हुताशनज्वालासंस्पृष्टम्। पवनं अर्थात् पूर्व्वमृत्तिकाकर्षणेन मृत्तिकान्तरदानम्। सर्व्वमृण्मयभाण्डभेदनम्। दारवाणां तक्षणम्। शङ्खशुक्तिरजतसुवर्णचैलानामद्भिः प्रक्षालनम्। कांस्यताम्रपात्राणामाकरे अर्थादग्नौ शुद्धिः। सौवीरपयोदधितक्राणां परित्यागः। लाक्षादिरसधान्यादिद्रव्याणां रक्षणम्। घृतादीनां तापनञ्च। | | | |
| | एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्व्वतां संसर्गदुष्टानां उपवासः। पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | बालापत्यारोगिगर्भिणीवृद्धानां नक्तम्। | ० | २ रजतरक्तिके। | यथाशक्ति। |
| | बालानां प्रहरद्वयमभोजनम्। | ० | १ रजतरक्तिका। | यथाशक्ति। |
| | चर्म्मकारादीनामविज्ञातसङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः। संहतानां एकस्मिन्नुपहते तस्यैव शोधनम्। न तु तत्स्पृष्टिनां सर्व्वेषां शोधनम्। एकशाखापाषाणादौ चाण्डालादिभिः सहारोहणे ब्राह्मणस्य स्नानमात्रम्। | | | |
| | तत्र पक्वभोजने ब्राह्मणानुज्ञापनं सचेलस्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च। एतदज्ञावधाने। | ० | ॥० पणाः। | यथाशक्ति। |
| | सन्निधाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | एतदुभयं ज्ञानविषयम्। अज्ञाने एकवृक्षादौ चाण्डालादिभिः सह पक्वभोजने अघमर्षणम्। एकावयविहारा परम्परास्पर्शेऽपि स्नानादिकम्। अत्रापवादः। "रथ्याकर्द्दमतोयानि नावः पन्थास्तृणानि च। मारुतेनाग्नि पूयन्ति पक्केष्टचितानि च॥" तृणानि तृणसमूहः। पक्केष्टचितानि मठादीनि। द्वितीयसंसर्गिततीयसंसर्गिणोर्हस्तपादप्रक्षालनपूर्व्वकमाचमनम्। चतुर्थसंसर्गे दोषाभावः।<br>इत्यस्पृश्यस्पर्शप्रायश्चित्तम् ॥ * ॥ | | | |
| अथ रहस्यपापानि। | रहस्यकृते पापे रहस्यप्रायश्चित्तं करणीयम्। अन्येनावेदितमित्यर्थः। तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा कस्यचिद्रहस्यपापस्य किं रहस्यप्रायश्चित्तमिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्य्यात्। तत्र यदि | | | |